This in the words of Śivāgra, means that Śiva is of the form of the universe (viśvamūrti), is its inner most self and guiding force (antaryāmī), is its only source (viśvakāraṇa) and finally He transcends (viśvātīta) the world.[17]

In Public domain. Digitization Muthulakshmi Research Academy

Notes

1. For a study of the influence of āgama-s on Śrīkaṇṭha readers may profitably refer to the research article of T. Ganesan: Śrīkaṇṭha's *Viśiṣṭādvaita: Influence of śaivāgama-s on Vedānta* published in The Journal of Ganganatha Jha Kendriya Sanskrit Vidyapeetha, Allahabad, vol. LXII (1-4), January-December, 2006.

2. prakṛtyadhikaraṇa: 1.4.23

3. Śrikaṇṭha cites here many vedic passages such as the *śatarudrīya* portion of the *Taittirīyasaṃhitā* where beginning from the mantra नमो हिरण्यवाहवे, and upto कुलञ्चानां पतये the text speaks Śiva's supreme lordship of the entire universe while the mantras beginning from नमः पर्णाय च पर्णशद्याय च describe Śiva as the entire universe. Also in the *Atharvaśira upaniṣad* the first two chapters speak of Śiva as the entire universe and the next chapters talk of His overlordship of the universe.

4. Because of this notion in the text called *Saṅkalpanirākaraṇam of Umāpati* (14th century) which briefly states the basic doctrines of eight different *śaiva* schools such as the *aikyavāda* and then refutes them, the view of Śrikaṇṭha is called *nimittakāraṇa-pariṇāmavāda.*

5. This view is conveyed in the *śruti* passage सर्वो वै रुद्रः. etc.

6. The same view is expressed clearly again in his commentary on *B. S.* 2:1:17: Śiva exists alone [without a second] fully endowed with the supreme Śakti that is non-different from Him and which is consciousness and which is the subtle form of the entire universe of conscious selves and inert objects and which exists as undifferentiated name and form; He, again [at the time of creation] spreads [*vistārayati*] His same Śakti into gross form of the entire universe of conscious selves and inert objects. The state of Śiva with His power contracted unto Himself is the state of dissolution and that where the same power is spread out in gross form is the state of creation.

7. Śrikaṇṭha adduces the well-known *Kaivalyopaniṣad* passage,
   उमासहायं परमेश्वरं प्रभुं त्रिलोचनम् नीलकण्ठं प्रशान्तम्।
   ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्।।
   according to which Śiva accompanied by His power Umā is the source of all beings and is the material cause.

8. He cites the *Vāyusaṃhitā* passage,
   शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम्।
   तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा।।
   which clearly state the origin of all *tattva*-s beginning from Śiva and ending with the earth (pṛthivī) from Śiva, the supreme cause.

9. किन्तु स्वदृक्क्रियाशक्तिकिरणात्मकमव्ययम्।
   व्यापकं नित्यमचलं सर्वतोमुखमेश्वरम्। (*Pauṣkarāgama*, Vp., 1: 20cd-21ab)

10. तस्मिन् विस्पष्टतन्मात्रो व्यापकत्वादिधर्मवान्। (ibid. 21ab)

11. अनन्योऽन्यश्चं तच्छक्तेः समवायात् स्थितः शिवः। (ibid. 21cd)

12. The relationship between the quality (guṇa) and its possessor (guṇa) is mentioned by Śrīkaṇṭha. (vide supra)

In Public domain. Digitization Muthulakshmi Research Academy

13. विन्द्ववस्थाविशेषेण शिवभेदस्त्वयोदितः।
विन्दोरचेतनत्वेन प्रवृत्तिः स्वत एव न।
कर्ता चेत् तत्प्रवृत्त्यर्थं विकारी स्यात् तदा शिवः।
(ibid. 27-28 ab)

14. कर्तृत्वं द्विविधं विप्राः सङ्कल्पात् करणादपि।
न हि सङ्कल्पमात्रेण कुलालैः क्रियते घटः।।
शिवः सङ्कल्पमात्रेण विन्दुक्षोभकरः सदा।
व्यापारविशेषेण येनायं विकृतो भवेत्।।
(ibid. 29-30 ab)

15. As evidence *Pauṣkarāgama*, verse 945 is cited.

16. *Saṃgrahabhāṣya* of Śivāgrayogī on *Śi vajñānabodhasūtra, 2.* (Refer to the edition of this text in Indian Philosophical Annual, vol. 20, Radhakrishnan Institute of Advanced Study in Philosophy, University of Madras, 1987-88, p. 21.)

17. For a detailed and analytical study of the contributions of Śivāgrayogī in the domain of *Śaivasiddhānta* doctrines and rituals see the present writer's forthcoming research publication *History of Śaivasiddhānta* 16th Century: Contributions of Śivāgrayōgī which is fully based on all available oeuvres (published and unpublished) of this author.

In Public domain. Digitization Muthulakshmi Research Academy

15

The Concept of Nṛtta and Nṛtya in Indian Tradition

L. Sudharmany

Introduction

The name India itself suggests 'hoary antiquity', a rich cultural legacy literally thousands of years old. If any culture could be said to be traditional, certainly Indian culture would seem to fit the bill. Before discussing the traditions of Indian performance, I would like to clarify how we use the words tradition and traditional. A tradition of performance in our nominative use of the word is virtually synonymous with genre. The word tradition, however, implies movement, action through time.

Drama is one of the important subjects of Sanskrit literature. As it is the imitation of lokavṛtta which is impersonated before the eyes of the spectator, its effect of the people is great. To heighten the appeal of the drama, the element of dance is added to it. According to a tradition found in *Abhinayadarpaṇa,* Bharata performed Nāṭya, Nṛtya and Nṛtta with the help of Gandharvas and Apsaras in the presence of Lord Śiva. Pleased at this dance, Śiva added his own as well as his consort Pārvatī's dance forms tāṇḍava and lāsya to the art of histrionics. Whatever may be the purpose of the above legend, it clearly indicates that there is an intimate relation between dance and the dramatic representations. Dance is considered as the oldest form of self-expression, rather it is the oldest drama itself.

In Bharata's *Nāṭyaśāstra* which is the first systematical work available on Indian dramaturgy, we find that Sanskrit drama had a very developed technique by that time and strict rules and injunctions had seen laid down for the depiction of the plot, its constitution, the specific types of characters, the delineation of particular rasas etc. in a detailed manner. On the basis of these constituent factors as well as the employment of various vṛttis, there arose various forms of such representations by laying emphasis on one or the other characteristic features or their different

In Public domain. Digitization Muthulakshmi Research Academy

combinations. But only those types of performances found recognition in *Nāṭyaśāstra* which were composed for the learned and cultured. And although we do not find any mention to the existence of popular forms, it can be conceived that the masses had their own performances for recreation in which dance played an important role. These forms had more or less an unrestricted natural growth according to the mood, taste and life of the common people and the prevalent situations in the society. Their number was getting larger. Their form was constantly changing. To get recognition they were trying to imbibe the technical details of the drama of the elite. The points of differences of some of the forms were becoming small and they were getting mixed up. So, the endeavor here is to present what all did the various forms of dramatic representations go through.

Forms of Dance

Music and bodily movement are requisite parts of any performance. The individual performer in an ensemble may be a specialist in music or acting dance but each specialist also must have an intimate knowledge of the other arts. It is necessary for a successful performance.

Spectacular representations involving abhinaya fall under the category of Dṛśyakāvya, the poetic composition which is seen and enjoyed. Nāṭya and drama are the general terms to be used for such representations in Sanskrit and English respectively. According to Sage Bharata, the earliest author on Indian dramaturgy, whose work is available to us, it is the imitation of the actions of all begins in the three worlds:

त्रैलोक्यस्यास्य सर्वस्य, नाट्यं भावानुकीर्तनम् । (NŚ, 1, 7)

Powerful emotional expressions and the descriptions of the situations are not required in the drama to the extent they are needed in Śravyakāvya in Dṛśyakāvya, the actors present those emotional circumstances in person and evoke rasas. The main purpose of any Kāvya is to evoke rasa in the mind of the sahṛdayas. The different between the two types of compositions is in the means of achieving that purpose.

The appeal of drama is said to be greater than that of other poetic compositions. Even a common person can understand the enacted drama

In Public domain. Digitization Muthulakshmi Research Academy

and enjoy it. It produces as far as possible, the different moods of the people by way of gestures before the eyes of the spectators. It is made delightful with songs and dance is beautiful and variegated like the picture board:

अनुभावानां वर्णना काव्यमुच्यते ।
तेषामेव प्रयोगस्तु नाट्यं गीतादिरञ्जितम् ।।
(*Vāṅmayaviveka*, Ch. I, p.20)

Also,
तद्धि चित्रं चित्रपटवद् विशेषसाकल्यात् ।
(*Abhinavabhārati*, I, p.288)

Abhinavagupta, great commentator on Bharata's *Nāṭyaśāstra*, is of the opinion that drama is the perfect form of literary composition. It has the nearest approach of relating when enacted, Kālidāsa, the great dramatist of India, also established that it is the one means which provides enjoyment simultaneously to the people of various tastes in different ways.[1]

We can find some stray verses in the books on dramaturgy, attributed to Kohala, in which he classifies the plays into Nāṭya and Mārga types. According to *Vāṅmayaviveka* of Cintāmaṇimiśra, Kohala pleased Mahādeva and Pārvatī and obtained from them, the dramas in two parts, known as Mārga and Nāṭya, of twenty different varieties. Ten types of Nāṭakas are known as Nāṭyas, where as Nāṭika, Prakaraṇī, Bhāṇikā, Hāsikā, Ḍīmikā, Vyāyoginī kalā, Utsāhavatī, Citrā, Vicitrā, Jugupsitā are the ten kinds of Mārgas. Again the Deśyās are sixteen in number, Dattila, Mātaṅga and Kohala by employing their own imagination divided these Deśyas out of different dramas by permitting different rasas and experimenting with different actors. They are known as Saṭṭaka, Troṭaka, Goṣṭhī, Vṛndaka, Śilpaka, Hallosaka, Ullāsaka, Rāsaka, Śrīgadita, Nāṭya, Lāsaka, Prastāva, Lāsikā, Samlāpaka, Preṅkṣaṇa, and Sambhavya. As the works of these writers are not available, the characteristics features of these varieties as given by them cannot be traced.

The *Kāmasūtra* of Vātsyāyana mentions the names of two varieties, Hallīsaka and Nāṭyarāsaka.

In Public domain. Digitization Muthulakshmi Research Academy

हल्लीसकक्रीडनकैः गायनैर्नाट्यरासकैः। (*Kāmasūtra* II, 10, 25)

The *Agnipurāṇa* also gives a list of twenty seven varieties, without making a distinction between the major and the minor ones. Rhetoricians like Bhāmaha and Daṇḍin in also mention some varieties. Bhāmaha points out that Dvīpadi, Śamyā, Rāsaka, Skandhaka etc., were intended for Abhinaya. Lāsya, Chalika, Śamyā etc., are called Prekṣārtha varieties by Daṇḍin. But there is no regular description of these varieties till the time of Abhinavagupta. It is he, who brought into light, the names of several spectacular varieties along with their features, by making references to the older dramatists: तदुक्तं चिरन्तनैः without specifying their names. These are Ḍombikā, Bhāṇa, Prasthāna, Ṣidgaka, Bhāṇika, Preraṇā, Rāmakṛṣṇa, Hallīsaka, Rāsaka and Kāvya. Abhinavagupta uses the terms Geyamānarūpakas and Nṛttaprabandhas for these varieties on the basis on the predominance of music and dance in each one of them. The types Ḍombikā, Rāsaka etc had their themes in songs and were in acted by dancing – movements at the time of Abhinavagupta. Most of them were dances without the details of Sandhis Sandhyangas found in the Rūpaka types. They differed from the plays in which different roles were enacted by different persons and Vācikābhinaya found the prominent place. But all of them were not dumb dance as in generally perceived. In some of the examples cited for these plays Vācikābhinaya is also seen, though it is very little.

These dance varieties were mainly useful as means of entertainment for common people. It may be, as already said, because of this character, that Bharata left the job of discussing these varieties which were prevalent among the lower strata of society, for Kohala. These musical compositions were based on the subjects such as drinking, playing in water, mutual decorations etc. and on the topics were suitable to women in the company of their husbands. Some of them were comedies. They were mainly composed in Jātyābhāsas as Sanskrit was the language of the learned.

These compositions were mostly enacted on the streets in gatherings, temples, squares etc where any spectator could move in. The purpose of these dance varieties like that of Rūpakas was also, besides entertainment, to teach the principle objects of human life. This was

In Public domain. Digitization Muthulakshmi Research Academy

done by way of Arthāntaranyāsa, Dṛṣṭānta, etc. Fables were also used for this purpose.

As to the evolution of these types, it is possible that some of the Nṛtya verities were very old. The use of the root *nṛt* in Vedas suggests that it is older than the root *naṭ*. In later periods, both of them were used to denote the same meaning. नट नृत्तौ. for a long time and their meanings were usually interchangeable. We find various expressions in our literature, such as they danced a play; a Saṭṭaka is to be danced: सट्टाकं नच्चिदव्वम्,[3] नाटकं ननर्तुः etc. (*Harivamśa*, Viṣṇuparva, 93, 28). Both the arts depended on each other. Gradually, they began to specify different meanings. Both had their own directions of progress, influencing each other and naturally imbibing the features of one another. Bharata's *Nāṭyaśāstra* codified the Nāṭya varieties, calling them Daśarūpa and leaving the work of grouping other types for Kohala, as already stated.

The term 'Rūpa' in the word Daśarūpaka signifying the Nāṭya varieties, is derived from the root *rūp* in the meaning of acting or showing. The words 'Rūpayati', 'Rūpayitvā' are often used in Sanskrit drama to denote stage representations. The term 'Rūpa' developed into 'Rūpaka' at the time of Dhanañjaya because of the visual character of such varieties and also since the events and emotions dealt with in them are represented in the person of the actors. After the time of Dhanañjaya, the word Rūpaka came to be used as a general term for drama.

Abhinaya is common to all dances. It has been categorized in the *Nāṭyaśāstra* into four pages. They are Āṅgikā, Vācikā, Āhārya and Sātvika. Āṅgikābhinaya is the Abhinaya expressed through the limbs. Ideas and emotions are beautifully displayed through various parts of the body. Vācikābhinaya indicates the use of language, regulation of the tone of voice, accent and rhythm which can bring out the lyrical qualities of the play. Āhāryabhinaya is related to the costumes and make-up of the actor in his various roles. This is depicted through the costumed and other decorations of the body. Sātvikābhinaya or the Abhinaya of the mind denotes the eight conditions viz. stoppage of action perspiration etc. The rhythmic exposition of moods sentiments and ideas by means of gestures, facial expression and movements of the body is called Abhinaya.

In Public domain. Digitization Muthulakshmi Research Academy

Dhanañjaya has also explained the terms Nāṭya, Nṛtya and Nṛtta in his *Daśarūpaka.* According to him, Nṛtta is based on Tāla and Laya; Nṛtya on Bhāvas and Nāṭya on the imitation of Avasthās. He also states that dramatic representations depicting rasa and bhāva fall under two categories, the rasāśraya and the bhāvāśraya. According to Dhanañjaya, Abhinaya is complete with all its four phases viz. Sātvika, Vācikā, Āṅgikā and Āhārya in Nāṭya or Rasātmaka varieties.

Dance finds its place in this class of dramas only to heighten the effect. It enhances the beauty of these plays and thus occupies only a subsidiary position. Following Bharata, Dhanañjaya has dealt with only the Rūpaka types along with Nāṭika in his *Daśarūpaka.*

Avaloka, the commentary on *Daśarūpaka* also mentions seven types of Nṛtyabhedas.[4] The *Śṛṅgāraprakāśa* of Bhoja adds Nāṭika and Saṭṭaka to the ten Rūpakas.

Hemacandra enumerates twelve types of Pāthyarūpakas like Bhoja but ends the list with the word Ādi. By the word Ādi, he means the varieties like Troṭaka etc.[5]

The number of Geya types is also twelve and the word Ādi is used at the end of this list also. Here the word Ādi, he means the types of Śamya, Chalita, Dvipadī etc.[6]

The *Nāṭyadarpaṇa* mentions he ten varieties of Rūpakas and calls Nāṭika and Prakaraṇī as the Saṅkīrṇa types. It says that other Saṅkīrṇa types are also possible by mixing two or three Rūpakas. As they are not in common vague and also not very interesting they have not been defined.[7]

But, at the end of this work, the author has enumerated thirteen more varieties though in the vṛttī portion only, because they were not mentioned by his predecessors and also they were less entertaining.[8]

Śāradātanaya, in his *Bhāvaprakāśa* gives the longest list of the spectacular representations which are thirty in numbers. Out of these ten are the rasātmaka types and twenty are bhāvātmaka.[9]

Ten rasātmaka types are the same as those of Bharata. The bhāvātmaka types are Troṭaka, Nāṭikā, Goṣṭhī, Sallāpa, Śilpaka, Ḍombi, Śrīgadita, Bhāṇī, Prasthāna, Kāvya, Preṅkṣaṇa, Hallīsaka, Durmallikā, Mallikā, Kalpavallī and Pārijātaka. In another list of

In Public domain. Digitization Muthulakshmi Research Academy

bhāvātmaka a varieties given in *Bhāvaprakāśa*, Bhāṇa is mentioned and that of Saṭṭaka is omitted. The Saṭṭaka is called a variety of Nāṭika.

According to Viśvanātha, there are ten Rūpaka varieties and eighteen Uparūpaka varieties. He also states that the general characteristics of all these spectacular representations are more or less the same as those of Nāṭaka.[10]

The *Saṅgītadāmodara* of Śubhaṅkara enumerates seventeen Uparūpaka varieties which are the same as those mentioned by Viśvanātha leaving out Prakaraṇikā.

The number of varieties mentioned in the different works on dramaturgy, the Śāstras, the Purāṇas and some works of rhetoricians under the names Prekṣārtha varieties, Mārgi types, Deśi types, Nṛtyaprakārāḥ, Nṛtyarūpakas, Geyarūpakas, Anyarūpakas and lastly Uparūpakas goes to forty three. These are Nāṭitā, Troṭaka, Saṭṭaka, Ḍombikā, Bhāṇa, Prasthāna, Hallīsaka, Kāvya, Goṣṭhī, Durmallikā, Preṅkṣaṇa, Sallāpa, Śilpaka, Mallikā, Kalpavallī, Pārijātaka, Prakaraṇikā, Ṣidgaka, Bhāṇīkā, Rāmakrīḍā, Prasthāna, Preraṇa, Rāsaka, Śrīgaditā, Nartānaka, Prekṣaṇaka, Natyarāsaka, Ullopyaka, Vilāsikā, Śamyā, Chālika, Dvīpadi, Skandhaka, Hāsikā, Ḍimikā, Viyoginī, Kalotsāhavitī, Citrā, Jugupsitā, Citratālā, Blindaka, Lāsikā, Lasakā, Vāra and Karṇa. In the absence of the details about some of them in the existing works and also due to the unavailability of some of the older works, we are not able to give the characteristic features of those varieties. We know them only by their names. The features of some of these varieties intermingle to a large extent with others or overlap them and this makes us think that they might be one and the same variety with minor differences such as in the names Lāsika and Vilāsikā. Similarly Ṣidgaka and Śilpaka may also be taken as one and the same variety. Bhoja has mentioned Śamya, Chalita and Dvīpadi as the varieties of Nartanaka.

After comparing and considering the minor differences in the names and the similarities of the features and also the non-availability of any information about some, the number of those varieties about which we get some knowledge comes to twenty-six. These are Nāṭitā, Troṭaka, Saṭṭaka, Prakaraṇikā, Ḍombikā, Bhāṇa, Prasthāna, Ṣidgaka or Śilpaka, Bhāṇīkā, Preraṇa, Rāmakrīḍā, Hallīsaka, Rāsaka, Kāvya, Śrīgaditā,

In Public domain. Digitization Muthulakshmi Research Academy

Goṣṭhī, Durmallikā, Nartānaka, Prekṣaṇaka, Natyarāsaka, Sallāpaka, Ullopyaka, Mallikā, Kalpavallī, Pārijātaka, Vilāsikā. The number of Rūpaka varieties as mentioned by Bharata is ten. To mark a distinction among these varieties named by Bharata, the four Sankīrṇa types which mostly derived their characteristics from Nāṭaka and Prakaraṇa, and the remaining, as the Bhāvātmaka varieties.

Conclusion

In Ṛgveda Goddess Uṣas is compared to a dancer. *Viṣṇudharmottarapurāṇa* tells us that to worship God by Nṛtta is to fulfill all desire and to him who dances the paths of salvation are unfolded. The dancer, as he undergoes mystical experiences in the dance, communicates the same to the audience. In other words, dance becomes the expressions of the experience of revelation and complete union with God, which leads us to believe that dance and all other fine arts have not only a utilitarian function but also a spiritual and cultural function in India.

At the early stage of development, three different facet of movement, all of which are still used in performance today, were recognized. Three forms of dance are still used in performance. They are Nṛtta or pure abstract or decorative dance. Nṛtya mime or gestures, is based on interpretation of the narrative content of performance. The last is Nāṭya which is considered as a performance in which acting and dance are combined in dramatic form.

Nṛtya means expression. It comes from the mind and is shown through the face and eyes. Nṛtya is based on a theme or story. In the Bharatanāṭyam 'Padam' is one of the Nṛtya item.

India has a secular heritage of ritual, folk and classical arts. Indian cultural dance is basically divided into three major categories. They are expressed in the forms of Nṛtta. It is pure dance which includes the basic dance steps and the variation of foot movements. For example in Bharatanāṭya 'Alārippu' is one of the Nṛtta item.

Nāṭya includes the dramatic representation of stories from mythology. In Bharatanāṭya 'Varṇam' is one of the Nāṭya items. Using the body as a medium of communication, the expression of dance is perhaps the most intricate and developed, yet easily understood art form. The fascination for Indian dance all over the world is indicative of the deep-

In Public domain. Digitization Muthulakshmi Research Academy

felt need to use the human body to express and elaborate the great universal truths. Indian dance does just that in a heightened, reverential form. Also, since dance is physical and visual, it illuminates India's cultural in a direct manner, playing on the sensibilities of the onlooker. Thus, those who are attracted to India will find the idiom of dance the best introduction to India's rich ethos and traditions.

Notes

1. नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् । (*Mālavikāgnimitram*, I, 4)
2. *Kāvyādarśa*, I, 39
3. *Kāvyamañjarī*, p. 9
4. डोम्बी श्रीगदितं भाणो भाणी प्रस्थानरासकाः।
   काव्यं च सप्त नृत्यस्य भेदास्स्युस्तेऽपि भाणवत्।। (*Avaloka*, p.2)
5. आदिशब्दात् कोहलादिलक्षितास्तोटकादये ग्राह्याः। (*Kaviśikṣā*, p. 390)
6. गेयं डोम्बिकाभाणप्रस्थानशिङ्गभाणिकाप्रेरणारामाक्रीडहल्लीसकरासेकगोष्ठीश्रीगदितरागकाव्यादि।
   (*Kāvyālaṅkārasūtravṛtti*, p.391)
7. एते च द्वे अपि मुख्यरूपकसङ्करनिष्पन्नत्वात् सङ्कीर्णभेदरूपे।
   एवमन्येऽपि सङ्करभेदाः रूपकद्वयत्रयादिसाङ्कर्येण सम्भवन्ति, परनदृष्टत्वादरञ्जकत्वाच्च न ते लक्ष्यन्त इति।।
   (*Nārāyaṇadarpaṇa*, p.708)
8. एतानि च स्वल्पमात्ररञ्जनानि निमित्तत्वात्।
   वृद्धैरनभिहितत्वाच्च वृत्तावेव कीर्तितानि।। (*Nārāyaṇadarpaṇa*, p.708)
9. त्रिंशद्रूपकभेदाश्च प्रकाश्यतेऽत्र लक्षणैः।
   रसात्मकाः दशैतेषु विंशद्भावात्मकाः मताः।। (*Bhāvaprakāśa*, p.221)
10. विना विशेषं सर्वेषां लक्ष्म नाटकवान्मतम्।
    सर्वेषां प्रकरणादिरूपकाणां नाटकाद्युपरूपकाणां च। (*Sāhityadarpaṇa*, VI, p.708)

References

1. Rāmasvāmiśāstri K.M, *Nāṭyaśāstra* of Bharatamuni II Ed, M. S. University Baroda, 1956.
2. Richmond P. Fasley, *Indian Theatre*, Vol.1, Motilal Banarsidass Publishers, New Delhi, Reprint, 2007.
3. Devi Rugmini, *Dance Dialect of India*, Vol III, Motilal Banarsidass Publishers, New Delhi, 2002.

ଔଓ

In Public domain. Digitization Muthulakshmi Research Academy

16

भावविकारवाचकशब्दाः

वि. आर्. मनोज्

भवते स्वपदार्थे भवनं भावः। सन्मात्रं भावलिङ्गं स्यादित्यभियुक्तोक्तेः। भावस्य विकाराः भावविकाराः। भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मस्वित्यमरोऽपि। परिणामो विकारः। वृद्धिविकासादयोऽल्पत्वदरिद्रत्वादयश्चात्रान्तर्भूताः। प्रकृते सत्तादिषट्को भावशब्देन विवक्षितः।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते। (ब्रह्मकाण्डम् - १२३) इति हरिवचनानुसारेण चराचराणामभिव्यक्तये शब्दव्यवहारस्य अनुपेक्षणीयत्वादाविर्भावतिरोभावपर्यन्तेषु भावविकारेषु आविर्भावस्य जनिः सिद्धिरित्यादिभिः शब्दैस्तथा तिरोभावस्य मृत्युर्नाश इत्यादिभिश्शब्दैश्च व्यवहारोऽभ्युपगम्यते। एवमेव स्थितिः परिणतिः वृद्धिः क्षतिरित्यादितत्तच्छब्दवाच्याः तन्मध्यभावाः। तथा हि जायते अस्ति विपरिणमते वर्धते अपक्षीयते नश्यति इति षड् भावविकारा भवन्तीत्याचार्यो वार्ष्यायणिः।

निरुक्तकारस्ततो भावविकारान्प्रत्येकान्वर्णयित्वान्तेऽथ इम एव भावविकाराः सन्ति किं वान्येऽपीत्यपेक्षायमुपक्रमते - अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीतिह स्माह इति। अर्थादस्माद् भावविकारषट्काद्येऽन्ये भावविकारा लक्ष्यन्ते ते पृथक्पृथगत्यन्तभिन्ना अपि सन्तः एतेषामेव विकारा भवन्ति। तद्यथा जनिशब्दवाच्यो भावविकारोऽनेकैरवान्तरभेदैरनेकैः पर्यायैः यथा उद्भवति सम्भवति निष्पद्यत इत्येवमादिभिरभिव्यज्यते। तद्वदस्तिशब्दवाच्यो भावविकारोऽनेकप्रभेदभिन्नोऽनेकपर्यायवचनश्चास्ति विद्यते वर्तते इत्येवमादिभिरभिव्यक्तो भवति। तथा विपरिणमते जीर्यति विवर्तते इत्येवमादिभिः विपरिणमति-शब्दवाच्यो भावविकारोऽभिव्यज्यते। एवं वर्द्धते-शब्दवाच्यो वर्धते पुष्यति वर्हति इत्येवं प्रकारः। तथापक्षीयति-शब्दवाच्यो ध्वस्यति दलति वशीर्यते इत्येवं रूपः। अन्ते च विनश्यति शब्दवाच्यो विनश्यति म्रियते विलीयते इत्येवमादिभिरभिव्यज्यते।

तथा चाचार्योऽभिप्रैति यदेते सर्व एव धातवो भाववचनास्तेषां सर्वेषामिहाध्ययने प्राप्ते शास्त्रातिगौरवभयादेतल्लक्षणमुत्सृष्टमिति। सोऽयमुपरिष्टादुक्तो लक्षणसङ्ग्रहोऽस्य लेखस्योपक्रमाय कल्पितः। यतो हि तत्पर्यायज्ञानमध्येतॄणां महते उपकाराय भविष्यतीति प्रतीमः। अतो भावविकारवाचकाः शब्दाः सावान्तरभेदाः प्रबन्धेऽस्मिन् प्रस्तोष्यन्ते। यास्काचार्यस्य निरुक्तं दुर्गाचार्यकृतां व्याख्यां काव्यश्चावलम्ब्यायं लेखः प्रस्तूयते।

१. जनिः। उद्भवति सम्भवति फलति निर्वर्तते प्ररोहति जायते उत्पद्यते राध्यति सिद्ध्यति निष्पद्यते राध्नोति साध्नोति इत्येते जनिबोधकाः पर्यायेण प्रयुज्यन्ते।

In Public domain. Digitization Muthulakshmi Research Academy

तदर्थं विवृण्वन् जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधतीति यास्कः। पूर्वभावो नाम प्रादुर्भावस्यादिः। प्रादुर्भावष्ठोपक्रमप्रभृत्यपवर्गपर्यन्तः। यथा वा बीजावपनात्प्रसवपर्यन्तम्। अत एव पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पजतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तमितीतः पूर्वत्र निरुक्ते प्रस्तुतम्। उपक्रमश्च जायमानस्यानवधृतरूपं बोधयति। तस्यामवस्थायां किमपि जायत इत्येतदनुमानगम्यं भवति। अपवर्गस्तावद् भूतसामान्ये निष्ठान्तशब्दवाच्यो भवति। यथा जात इति। तस्याञ्चावस्थायां नासज्जायत इति न्यायेन विद्यमानमपि अपरं भावमस्तित्वरूपमस्ति भवति विद्यते इत्येतच्छब्दवाच्यं नाचष्टे। प्रत्युत जायते इत्येवोच्यते जनेरपरिपूर्णत्वात्। अत एवापवर्गस्तावद् भूतसामान्ये निष्ठान्तशब्दवाच्यो भवति यथा जात इत्युपरिष्टादवोचाम। अत एवानवधृतरूपं हि तस्यामवस्थायां तद्भवत्यनुमानगम्यं किमपि जायत इति। नापि प्रतिषेधति। अस्तित्वस्य प्रतिषेधं न करोतीत्यर्थः। यतो ह्यस्तित्वं प्रतिषेधन्ननात्मक एव स्याद् कमालम्ब्य जायेत। तदवधारणकालस्योपस्थिततत्वाच्चेति दुर्गाचार्यः। सर्वमेतत्सङ्गृह्योक्तं जायत इति पूर्वभावास्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधति इति। 'जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव' इत्यमरो जनिपर्यायानाह।

उद्भवति सम्भवति फलति निर्वर्तते प्ररोहति जायते उत्पद्यते राध्यति सिद्ध्यति निष्पद्यते राध्नोति साध्नोति इत्येतेषु जनिबोधकेषु पर्यायेषु उद्भवत्यादिप्ररोहतिपर्यन्ताः भौव्वादिकाः। आद्यौ उत् सम् पूर्वकाद् भू सत्तायाम् (भ्वा.१) इत्यस्मान्निष्पन्नौ। कालिदासकृतौ कुमारसम्भवशब्दोऽत्र दृष्टान्तः। सम्भवशब्दस्यात्रोद्भवो जनिरर्थः। तथा हि काव्ये-

'तदिच्छामो विभो सृष्टं सेनान्यं तस्य शान्तये।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः।।
(कुमारसम्भवम् - २.५१)

इति देवैः प्रार्थितो ब्रह्म अभ्यनुजानाति -

'सम्पत्स्यते वः कामोऽयं कालः कश्चित्प्रतीक्ष्यताम्।
न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना।।'
(कुमारसम्भवम् - २.५४)

इति। सिद्धिशब्दोऽप्यत्र तमेवार्थमाख्यातुं प्रयुक्तो दृश्यताम्। फलति इति फल निष्पत्तौ (भ्वा.५३०) इत्यस्मान्निष्पन्नः। भक्तिस्त्वयि स्थिरतरा भगवन्यदि स्याद्दैवेन नः फलति दिव्यकिशोरमूर्तिरिति लीलाशुकः (कृष्ण.१०७)। निर्वर्तत इति निरुपसर्गपूवकाद् वृतु वर्तने (भ्वा. ७५८) इत्यतो निष्पद्यते। प्ररोहतीति प्रवूर्वात् रुह बीजजन्मनि प्रादुर्भावे च (भ्वा. ८६०) इत्यतो निष्पद्यते। न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहतीति माघः (शिशु.१.६०)

अथ जायत इत्यारभ्य निष्पद्यते इति यावत् देवादिकाः। जायत इति जनी प्रादुर्भावे (दिवा.११५०) इत्यस्य रूपम्। 'असंशयं मृत्युरिति प्रजानतो नरस्य रागो हृदि यस्य जायत' इत्यश्वघोषः (बुद्ध ४: ९९)। उत्पद्यत इति उत्पूर्वात् पद गतौ (दिवा. ११७०) इत्यस्मान्निष्पद्यते। राध्यति इति

In Public domain. Digitization Muthulakshmi Research Academy

राधोऽकर्मकाद्वृद्धावेव (दिवा. ११८१) इत्यस्मान्निष्पन्नः। दैवं पर्यालोचयतीत्यर्थे विप्रश्ने आयत्तौ पाके च राध्यतीति प्रयोगो दृश्यते। सिद्ध्यति इति षिधु संराद्धौ (दिवा. ११९३) इत्यस्य रूपम्। सिद्धे निर्वृत्तनिष्पन्नावित्यमरः। निष्पद्यते इति निरुपसर्गपूर्वात् पद गतौ (दिवा. ११७०) इत्यतो निष्पन्नः। शब्दो निष्पद्यत इत्यादौ प्रकृतिप्रत्ययाद्यन्वयेन वाक्येषु प्रयोक्तुं योग्यस्य शास्त्रीयस्य शब्दस्य निष्पत्तिरर्थः। अत्र प्रकृतिप्रत्ययाः कल्पिताः प्रक्रियालाघवार्थम्। नाम शब्दोऽस्त्येव। भविष्यति च। शास्त्रीयप्रक्रियाद्वारा निष्पादनेन सम्प्राप्तिर्नाम तच्छब्दावगमो लक्षितः एतेन शब्दस्य नित्यत्वहानिः नास्ति। प्रयोगनैरन्तर्यात्। अत एव पूर्वापरीभूतं भावमाख्यातेनाचष्ट इति सङ्गतार्थम्। अन्त्यौ राध्नोति साध्नोति इत्येतौ राध साध संसिद्धौ (स्वा. १२६३, १२६४) इत्येतयो रूपे। अन्नरन्धनमित्यादावन्नस्य तण्डुलेभ्यो विक्लिन्नस्योदनस्य पाकद्वारा सम्प्रातिरर्थः।

१. स्थितिः। भवति मठति वर्तते स्थलति तिष्ठति अवतिष्ठते वसति आस्ते अस्ति विद्यते ध्रियते क्षियति इत्येते स्थितिबोधकाः पर्यायेण प्रयुज्यन्ते।

स्यादास्या त्वासना स्थितिरित्यमरः। स्थितिः सत्ता। सतो भाव इत्यर्थः। द्रव्यगुणकर्मवृत्तौ कालसम्बन्धेन विद्यमानतायाञ्च प्रयुज्यते। उत्पन्नस्य सत्वस्यावधारणं सत्तेति निरुक्तम्। न विपरिणाममुत्तरकालिकमाचष्टे अपूर्णत्वात्। न तं प्रतिषेधति उपस्थितत्वादिति तद्व्याख्याने दुर्गाचार्यः।

भवति मठति वर्तते स्थलति तिष्ठति अवतिष्ठते वसति आस्ते अस्ति विद्यते ध्रियते क्षियति इत्येतेषु स्थितिबोधकेषु पर्यायेषु भवत्यादिवसतिपर्यन्ताः भ्वादौ। ततो द्वावादादिकौ। विद्यत इति दिवादौ। अन्त्यौ तौदादिकौ। भवतीति भू सत्तायाम् (भ्वा. १) इत्यस्य रूपम्। प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मेति कालिदासः (मेघ. २.३०)। मठति इति मठ मदनिवासयोः (भ्वा.३३२) इत्यतो निष्पन्नः। वर्तते इति वृतु वर्तने (भ्वा. ७५८) इत्यस्य रूपम्। हृदि परं न बहिः खलु वर्तते सखि यतस्तव एव विषद्यत इति श्रीहर्षः (नैष. ४.१०८)। स्थलति इत्येतत् ष्ठल स्थाने (भ्वा. ८३७) इत्यतो निष्पन्नम्। तिष्ठति इति ष्ठा गतिनिवृत्तौ (भ्वा. ९२९) इत्यस्मान्निष्पन्नः। अयं स ते तिष्ठति सङ्गमोत्सुको विशङ्कसे भीरु यतोऽवधीरणामिति कालिदासः (शाकु. ३.१२) अवतिष्ठत इत्यत्रावपूर्व ष्ठा गतिनिवृत्तौ (भ्वा. ९२९)। 'समवप्रविभ्यः स्थः' (पा.सू. १.३.२२) इत्यात्मनेपदम्। क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसाविति कालिदासः (रघु. ८.८७) वसति, इत्यत्र वस निवासे (भ्वा. १००६) इति धातुः। हृदये वसतीति मत्प्रियं यदवोचस्तदवैमि कैतवमिति कालिदासः (कुमा. ४.९)। आस्ते इति आस उपवेशने (अदा. १०२२) इत्यस्मान्निष्पन्नः। 'यस्ते नवः पल्लवितः कराभ्यां स्मितेन यः कोरकितस्तवास्त' इति श्रीहर्षः (नैष. ३.१२१)। अस्ति इति अस भुवि (अदा. १०६६) इत्यस्य रूपम्। "हृदय एव तवास्ति स वल्लभस्तदपि किं दमयन्ति विषीदसी'ति श्रीहर्षः (नैष.४.१०८)। विद्यते इति विद सत्तायाम् (दिवा. ११७२) इत्यस्य रूपम्। 'अवाप्यते वा किमियद्भवत्या चित्तैकपद्यामपि विद्यते य इति श्रीहर्षः (नैष. ३.६३)। ध्रियते इति धृङ् अवस्थाने (तुदा. १४१३) इत्यस्य रूपम्। 'द्वारि ध्रियते रामो दिदृक्षते' सत्यपूतं त्वा'मिति हरदत्तसूरिः (राघव. १.४७) क्षियतीति क्षि निवासगत्योः (तुदा. १४०८) इत्यतो निष्पन्नः।

In Public domain. Digitization Muthulakshmi Research Academy

३. परिणतिः। जीवति बलति श्वसिति अनिति अन्यते ऊर्जयति प्राणिति समनिति उदनिति व्यनिति अपानिति आतङ्कति कठति क्षञ्जयति विवर्तते कल्पते परिणमति परिणमते सम्पद्यते मस्यति इत्येते परिणतिबोधकाः पर्यायेण प्रयुज्यन्ते।

परिणामो विकार इति प्रकृतेरन्यथाभावे। विपूर्वः डुकृञ् करणे (तना. १४७३) इत्यस्माद् 'भावे' (पा. सू. ३.३.१८) इति घञ्। परिणामो विकारे द्वे इत्यमरः। परिणमत इत्यप्रच्यवमानस्य तत्वाद्विकारमिति यास्कः। अप्रच्यवमानस्येत्यस्य तत्वादपभ्रश्यमानस्येत्यर्थः। तद्भावस्तत्वम्।

तत्वात्तद्भावादस्तित्वात्पुरुषत्वाद्वा विकारं विक्रियामात्रं ब्रवीति।
न वृद्धिमाचष्टे अपूर्णत्वान्न च तां प्रतिषेधति उपस्थितत्वात् ।।

इति दुर्गाचार्यः। परिणामो विकारो द्वे समे विकृतिविक्रिये इत्यमरः। तत्राद्या षट् जीवस्य परिणतिं बोधयन्ति।

वाङ्मनःप्राणकरणग्रामानुप्रविष्टे ब्रह्मणि।
प्राणान् क्षेत्रज्ञरूपेण धारयन् जीव उच्यते।।

घटावच्छिन्नाकाशवच्छरीरत्रितयावच्छिन्ने चैतन्ये। जीवोऽसुदारणमित्यमरः। जीवति बलति श्वसिति अनिति अन्यते ऊर्जयति इत्येतेषु षट्स्वाद्यौ भ्वादी। अपरावादादिकौ। उपान्त्यो दिवादिः। अन्त्यश्चुरादिः। जीवतीति जीव प्राणधारणे (भ्वा. ५६२) इत्यस्मान्निष्पन्नः। 'म्रियते म्रियमाणे या त्वयि जीवति जीवती'ति हर्षदेवः (नाग. ४.१७)। बलति इति बल प्राणने धान्यावरोधे च (भ्वा. ८४१) इत्यस्य रूपम्। श्वसितीति श्वस प्राणने (अदा. १०७०) इत्यस्मान्निष्पन्नः। 'अथ कले कलयं श्वसिति स्फुटं चलति पक्ष्मचले परिभावये'ति श्रीहर्षः (नैष. ४.११३)। अनिति इति अन प्राणने (अदा. १०७१) इत्यतो निष्पद्यते। अन्यते इति अन प्राणने (दिवा. ११७६) इत्यस्माज्जायते। अण इति पाठान्तरम्। अतः पक्षे अण्यते। ऊर्जयति इति ऊर्ज बलप्राणनयोः (चुरा. १५५०) इत्यस्य रूपम्।

ततः प्राणिति समनिति उदनिति व्यनिति अपानिति इत्येते पञ्च प्राणवृत्तिषु प्रयुज्यन्ते। पुंसि भूम्न्यसवः प्राणा इत्यमरः। प्राणानां वृत्तिर्व्यापारः प्राणवृत्तिः। पञ्चवृत्तिके देहस्थे वायौ। यथाक्रमं प्र सम् उद् व्य (वि+अ) अप इत्येवम्पूर्वकस्य अन प्राणने (अदा. १०७१) इत्यस्यामुनि रूपाणि। प्राणितीत्यत्र 'अनितेः' (पा.सू. ८.४.१९) इति णत्वम्। प्राणोऽपानः समानश्चोदानव्यानौ चेति पञ्च वायवः। हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले। उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः इति तत्सथानानि। अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम्। भाषणादिनिमेषादि तद्व्यापाराः क्रमादमी। इति तत्कर्माणि।

तत आतङ्कति कठति क्षञ्जयति इति त्रयः कृच्छ्रजीवे प्रयुज्यन्ते। स्यात्कष्टं कृच्छ्रमित्यमरः। एष्वाद्यौ भ्वादी। अन्त्यश्चुरादिः आतङ्कति इति आ तकि कृच्छ्रजीवने (भ्वा.११८) इत्यस्य रूपम्। कठति इति कठ कृच्छ्रजीवने (भ्वा. ३३३) इत्यतो जायते। क्षञ्जयतीति क्षजि कृच्छ्रजीवने (चुरा. १६२२) इत्यस्मान्निष्पन्नः। क्वचित् छजि इति पाठः। तन्मते छञ्जयति। अन्त्याश्च विवर्तते कल्पते परिणमति परिणमते सम्पद्यते मस्यति इत्येते पञ्च परिणामसामान्ये

In Public domain. Digitization Muthulakshmi Research Academy

प्रयुज्यन्ते। परिणामो विकार इत्यमरः परिणाममात्रमिह विवक्षितम्। एतेष्वाद्यास्त्रयो भौवादिकाः। अन्त्यौ दिवादि।

विवर्तते इति विपूर्वस्य वृतु वर्तने (भ्वा. ७५८) इत्यस्य रूपम्। कल्पते इति कृपू सामर्थ्ये (भ्वा. ७६२) इत्यस्मान्निष्पन्नः। परिणमति इति परिपूर्वस्य णम प्रह्वत्वे शब्दे च (भ्वा. ९८२) इत्यस्य रूपम्। परिणमते इति परिपूर्वात् णम प्रह्वत्वे शब्दे च (भ्वा. ९८२) इत्यतो निष्पन्नः। सम्पद्यते इति सम्पूर्वस्य पद गतौ (दिवा. ११७०) इत्यस्य रूपम्। मस्यतीति मसी परिणामे (दिवा. १२२२) इत्यस्मान्निष्पद्यते। मसी स्थाने समी इत्येके। तन्मते सम्यति।

४. वृद्धिः एधते विकचते स्फोटते वठति विजृम्भते फुल्लति क्रम्यते क्रमते स्फायते स्फीतीभवति आप्यायते प्यायते उन्मीलति पीवति मीवति तीवति नीवति वंहते मंहते पूषति पोषति बर्हति बृंहति वर्धते प्रथते प्रसते विपोलति विकसति श्वयति तौति तवीति पुष्यति आपूर्यते पुष्यति ऋध्यति ऋध्नोति स्फुटति विपोलयति स्थूलयते महीयते इत्येते वृद्धिबोधकाः पर्यायेण प्रयुज्यन्ते। स्फातिर्वृद्धावित्यमरः।

५. वर्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानाम् इति निरुक्तम्। दुर्गाचार्यस्तमित्थं प्रपञ्चयति - व्याख्याने वर्धत इत्येष शब्दः स्वेषामङ्गानां शिरोग्रीवाबाहूदरादीनामभ्युच्चयमभ्युच्चिततां (सञ्चयं) ब्रवीति। सांयौगीकानां संयोगजनितानां वा अर्थानां हिरण्यधान्यादीनामभ्युच्चयं ब्रवीतीति पूर्वेणाभिसम्बध्यतेऽर्थवशात्। तत्प्रयोगमाह वर्धते विजयेनेति वा वर्धते शरीरेणेति वेति निरुक्ते। व्याख्याने तावदत्राद्यमवरोहणक्रमेण सांयौगिकेषूदाहरणं द्वितीयं स्वाङ्गाभ्युच्चये। अत्र वर्धत इति ब्रुवाणो नापक्षयमाचष्टेऽपूर्णत्वात्। नापि तं प्रतिषेधति उपस्थितत्वादिति।

वठत्यादि श्वयत्यन्ताः भौवादिकाः। तौति तवीतीत्येतौ छान्दसौ। पुष्यति इत्यारभ्य मेध्यत्यन्ताः दैवादिकाः। ऋध्नोति स्वादौ। स्फुटति तुदादौ। ततो द्वौ चुरादी। अन्त्यः कण्ड्वादिः। एधत इति एध वृद्धौ (भ्वा. २) इत्यस्य रूपम्। विकचत इति विपूर्वात् कच बन्धने (भ्वा. १६८) इत्यस्मान्निष्पन्नः। स्फोटते इति स्फुट विकसनो (भ्वा. २६०) इत्यतो जायते। वठति इति वठ स्थौल्ये (भ्वा. ३३१) इत्यस्मान्निष्पद्यते। विजृम्भत इति विपूर्वस्य जृभि गात्रविनामे (भ्वा. ३८९) इत्यस्य रूपम्। फुल्लति इति फुल्ल विकसने (भ्वा. ४३३) इत्यस्मान्निष्पद्यते। क्रमते क्रम्यते इति क्रमु पादविक्षेपे (भ्वा. ४७३) इत्यस्य रूपम्। 'अनुपसर्गाद्वा' (पा. सू.१.२.४३) इति पक्षे आत्मनेपदम्। 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' (पा. सू. ३.१७०) इति शब्विषये श्यन् विकल्पः। स्फायते इति स्फायी वृद्धौ (भ्वा. ४८७) इत्यतो निष्पद्यते। स्फीतीभवति इति स्फायी वृद्धौ (भ्वा. ४८७) इत्यस्मात् क्तप्रत्यये 'स्फायः स्फी निष्ठायाम्' (पा. सू. ६.१.१२२) इति स्फीभावे स्फीतशब्दाद् अभूततद्भावे इत्यनुवर्तमाने 'कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः' (पा. सू. ५.४.५०) इति च्विः। ततश्च्व्यन्ताद् भवतेरनुपयोगः। आप्यायते इत्यत्र ओप्यायी वृद्धौ (भ्वा. ४८८) इति धातुः। प्यायत इत्यत्रापि ओप्यायी वृद्धौ (भ्वा. ४८८) इति धातुः। ओकारो धात्ववयवो नेति केचित्। तन्मते प्यायते इत्येतदपि तत एव धातोः निष्पन्नमवधेयम्। उन्मीलति

In Public domain. Digitization Muthulakshmi Research Academy

इति उत्पूर्वस्य मील निमेषणे (भ्वा. ५१७) इत्यस्य रूपम्। पीवति इत्यत्र पीव स्थौल्ये (भ्वा. ५६३) इति धातुः। मीवति इति मीव स्थौल्ये (भ्वा. ५६४) इत्यस्य रूपम्। तीवति इति तीव स्थौल्ये (भ्वा. ५६५) इत्यतो जायते। नीवति इति णीव स्थौल्ये (भ्वा. ५६६) इत्यस्मान्निष्पद्यते। वंहते इति बहि वृद्धौ (भ्वा. ६३३) इत्यस्य रूपम्। क्वचिद् बंहते इति पठितं वबयोरभेदादित्यवधेयम्। मंहते इति महि वृद्धौ (भ्वा. ६३४) इत्यतो भवति। पूषति इति पूष वृद्धौ (भ्वा. ६७५) इत्यस्माज्जायते। पोषति इति पुष पुष्टौ (भ्वा. ७००) इत्यस्माद् भवति। बर्हति इति बृह वृद्धौ (भ्वा. ७३५) इत्यस्य रूपम्। बृंहति इति बृहि वृद्धौ (भ्वा. ७३६) इत्यस्मान्निष्पद्यते। वर्धते इति वृधु वृद्धौ (भ्वा. ७५९) इत्यस्य रूपम्। प्रथत इति प्रथ प्रख्याने (भ्वा. ७६५) इत्यस्माज्जायते। प्रसते इति प्रस विस्तारे (भ्वा. ७६६) इत्यस्मान्निष्पद्यते। विपोलति इति विपूर्वः पुल महत्वे (भ्वा. ८४२) इत्यस्य रूपम्। विकसति इति विपूर्वात् कस गतौ (भ्वा. ८६१) इत्यतो निष्पन्नम्। श्वयति इति टुओशिव गतिवृद्ध्योः (भ्वा. १०११) इत्यस्माज्जायते। तौति तवीति इत्येतौ छान्दसं विदुरिति भट्टमल्लकोशः। पुष्यति इति पुष्प विकसने (दिवा. ११२३) इत्यस्य रूपम्। आपूर्यते इति आ पूरी आप्यायने (दिवा. ११५२) इत्यतो जायते। पुष्यति इति पुष पुष्टौ (दिवा. ११८३) इत्यस्य रूपम्। 'सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्यामिति कालिदासः (मेघ. २.१७)। ऋध्यति इति ऋधु वृद्धौ (दिवा. १२४६) इत्यतो जायते। ऋध्नोति इति ऋधु वृद्धौ (स्वा. १२७२) इत्यस्य रूपम्। स्फुटति इति स्फुट विकसने (तुदा. १३७४) इत्यस्मान्निष्पन्नम्। ज्वलति पवनवृद्धः पर्वतानां दरीषु स्फुटति पटुनिनादैः शुष्कवंशस्थलीष्विति कालिदासः (ऋतु. १.२५)। विपोलयति इत्यत्र विपूर्वः पुल महत्वे (चुरा. १६०२) इत्ययं धातुः। स्थूलयते इति स्थूल परिबृंहणे (चुरा. १९०५) इत्यतो जायते। महीयते इति महीङ् पूजायाम् (कण्ड्वादिः) 'कण्ड्वादिभ्यो यक्' (पा.सू. ३.१.२७) इति यक्। 'सनाद्यन्ता धातवः' (पा. सू. ३.१.३२) इति यगन्तस्य धातुत्वाल्लडादयः।

उपयुक्तेषु वृद्धिपर्यायेषु विकचते स्फोटते विजृम्भते फुल्लति उन्मीलति विकसति पुष्यति स्फुटति इत्येते विशेषतः विकासेऽर्थान्मुकुलीभूतस्योत्फुल्लतायां गम्यमानायां प्रयुक्ता दरीदृश्यन्ते।

५. क्षयः। अपक्षयति चुट्टयति चुण्डते द्राडते दरिद्राति दीयते दलति दस्यति फलति क्रुञ्चति ह्रसति जिनाति लिश्यते विशीर्यते जारयति जायति जीर्यति झीर्यति जरति जृणाति जूर्यते कृश्यति कुञ्चति कूणयति मीलति मुकुलीभवति पुट्टयति पूयते ध्राडते शटति सायति सीदति सङ्कुचति स्फोटति स्मीलति तस्यति व्यृध्नोति व्यृध्यति क्षायति शीयते क्ष्मीलति इत्येते क्षयबोधकाः पर्यायेण प्रयुज्यन्ते।

अपक्षीयत इत्यनेनैव व्याख्यातः प्रतिलोममिति निरुक्तम्। यथैव हि स्वाङ्गैः स्वांयौगिकैर्वा द्रव्यैरुपचीयते तथैवापक्षीयते। इत्येवमुपचयप्रयोगः पूर्वनिर्दिष्टः स अपक्षीयत इत्यनेनैव प्रतिलोमं विपरीतं व्याख्यातः। भवति हि वृद्धेः प्रतिलोममपक्ष्यः। प्रतिगतं लोम प्रतिलोमम्। तत्रापि नाचष्टे अपरभावं न वा प्रतिषेधतीति दुर्गाचार्यो व्याख्याति।

In Public domain. Digitization Muthulakshmi Research Academy

क्षयो बहुमुखः क्वचिदुन्नीलतिस्य निमीलनेन नाशोन्मुखतोच्यते। क्वचिज्जीवतः जराजीर्णतारूपः। अपरत्र पत्रफलमूलादिविशरणरूपः। क्वचिद्ध्वासतापातनरूपो यो नाशपूर्वभावी। एकत्र धनधान्याद्याढ्यस्य दारिद्र्यरूपः। अन्यत्र शक्तेरपक्षयरूपः। एवञ्च क्षयस्य नानाप्रकारतया तद्वाचकशब्दबाहुल्यात्त इह प्रसिद्धार्थकतामाश्रित्य वर्गीक्रियन्ते। तथा हि -

सङ्कोचार्थका षट् सार्वत्रिकाः - मीलति स्मीलति क्ष्मीलति सङ्कुचति कूणयति मुकुलीभवतीत्येते सङ्कोचार्थकाः पर्यायेण प्रयुज्यते। एतेषु षट्स्वाद्यास्त्रयो भ्वादौ ततस्तुदादिश्चुरादिश्च । अन्त्यष्टवयन्तः मीलति इति मील निमेषणे (भ्वा. ५१७) इत्यस्य रूपम्। स्मीलति इति स्मील निमेषणे (भ्वा. ५१९) इत्यतो निष्पद्यते। क्ष्मीलति इति क्ष्मील निमेषणे (भ्वा. ५२०) इत्यतो निष्पन्नः। सङ्कुचति इति सम्पूर्वात् कुच सङ्कोचने (तुदा. १३६९) इत्यतो जायते। कूणयति इति कूण सङ्कोचने (चुरा. १६८९) इत्यस्य रूपम्। मुकुलीभवतीति मुकुलशब्दात् च्व्यन्ताद् भवतेरनुप्रयोगः।

क्षयावस्थासूचिकायां जरायां गम्यमानायमेते सप्त प्राचुर्येण प्रयुज्यन्ते - जीर्यति झीर्यति जूर्यते जृणाति जिनाति जरति जारयति। एतेषु सप्तसु आद्यास्त्रयो दिवादयः। ततो द्वौ क्र्यादी। अन्त्यौ चुरादी। विस्रसा जरेत्यमरः। जीर्यति इति जॄष् वयोहानौ (दिवा. ११३१) इत्यतो जायते। झीर्यति इति झॄष् वयोहानौ (दिवा. ११३२) इत्यस्मान्निष्पद्यते। जूर्यते इति जूरि हिंसावयोहान्योः (दिवा. ११५७) इत्यस्य रूपम्। जृणाति इति जॄ वयोहानौ (क्र्या. १४९५) इत्यस्मान्निष्पद्यते। जिनाति इति ज्या वयोहानौ (क्र्या. १५००) इत्यस्य रूपम्। 'ग्रहिज्यावयिव्यधि' (पा. सू. ६.१.१६) इत्यादिना सम्प्रसारणम्। जरति इति जॄ वयोहानौ (चुरा. १८१५) इत्यतो जायते। 'आधृषाद्वा' (गणसूत्रम्) इति धृषधातुमभिव्याप्य विभाषितणिचो धातवः पठिताः। तत्रायं जरतिः। तेन णिजभावे जरति। णिचि जारयति इत्यग्रे वक्ष्यते। जारयति इति जॄ वयोहानौ (चुरा. १८१५) इत्यस्मान्निष्पद्यते। 'आधृषाद्वा'(गणसूत्रम्) इति धृषधातुमभिव्याप्य विभाषितणिचो धातवः पठिताः। तत्रायं जरतिः। तेन णिजभावे जरति इत्युपरिष्टादुदाहृतम्। प्रकृते णिचि जारयति।

विशरणसामान्ये एते नव प्रचुरं प्रयुज्यन्ते - द्राडते ध्राडते स्फोटति पूयते दलति फलति सीदति शीयते विशीर्यते अन्त्यवर्जं सर्वे भ्वादयः। द्राडते इति द्राडृ विशरणे (भ्वा. २८७) इत्यस्मान्निष्पन्नः। ध्राडत इत्येतत् ध्राडृ विशरणे (भ्वा. २८८) इत्यस्मान्निष्पद्यते। शटतीति शटरुजाविशरणगत्यवसादनेषु (भ्वा. २९९) इत्यस्मान्निष्पद्यते। स्फोटति इति स्फुटिर् विशरणे (भ्वा. ३२९) इत्यस्य रूपम्। पूयत इति पूयी विशरणे दुर्गन्धे च (भ्वा. ४८४) इत्यस्य रूपम्। दलति इति दल विशरणे (भ्वा. ५४८) इत्यतो जायते। फलति इति ञिफला विशरणे (भ्वा. ५१६) इत्यस्माज्जायते। वीरोदात्तगुणोत्तरो रघुपतिः काव्यार्थबीजं मुनिर्वाल्मीकिः फलति स्म यस्य चरितस्तोत्राय दिव्या गिर (अनर्घ.१.८) इति मुरारिप्रयोगे तु फलतीत्यस्याविर्भवतीत्यर्थः। इह तावदङ्कुरोद्गमपूर्वभावि फलविरणं गम्यते। सीदति इति षद्लृ विशरणगत्यवसादनेषु (भ्वा. ८५५) इत्यस्य रूपम्। शीयते इत्येष शदलृ शातने (भ्वा. ८५६) इत्यस्मान्निष्पद्यते। पाघ्राध्मास्थाम्नादाण् (पा. सू. ७.३.७८) इत्यादिना शीयादेशः। 'शदेः शितः' (पा.सू.

In Public domain. Digitization Muthulakshmi Research Academy

१.३.६०) इत्यात्मनेपदम्। विशीर्णतायामयमिति कौमुद्याम्। विशीर्यते इत्येतद् विपूर्वस्य शॄ हिंसायाम् (क्र्या. १४८९) इत्यस्य कर्मणि रूपम्।

अल्पत्वसामान्ये एतेऽष्टौ प्रचुरं प्रयुक्ता अवलोक्यन्ते - कुञ्चति क्रुञ्चति चुण्डते ह्रसति लिश्यते कृश्यति पुट्टयति चुट्टयति। आद्याश्चत्वारो भ्वादयः। उपान्त्यौ दिवादी। अन्त्यौ चुरादी। कुञ्चतीति कुञ्च कौटिल्याल्पीभावयोः (भ्वा. १८५) इत्यस्मान्निष्पन्नः। क्रुञ्चतीति क्रुञ्च कौटिल्यापीभावयोः (भ्वा. १८६) इत्यतो निष्पद्यते। चुण्डते इति चुडि अल्पीभावे (भ्वा. ३२५) इत्यस्य रूपम्। ह्रसति इति ह्रस शब्दे (भ्वा. ७११) इत्यस्माज्जायते। लिश्यते इति लिश अल्पीभावे (दिवा. ११८०) इत्यतो जायते। कृश्यति इति कृश तनूकरणे (दिवा. १२२८) इत्यतो निष्पद्यते। पुट्टयतिति पुट्ट अल्पीभावे (चुरा. १५६०) इत्यस्य रूपम्। चुट्टयतीति चुट्ट अल्पीभावे (चुरा. १५६१) इत्यस्य रूपम्।

दरिद्रत्वसामान्ये प्रचुरं प्रयुक्ता इमे अवलोक्यन्ते - दरिद्राति। व्यृध्यति। व्यृध्नोति। क्रमादेते अदादौ दिवादौ स्वादौ च भवन्ति। दरिद्राति इति दरिद्रा दुर्गतौ (अदा. १०७४) इति धातुः व्यृध्यति इति विपूर्वः ऋतु वृद्धौ (दिवा. १२७२) इत्यस्मान्निष्पन्नः। विगता ऋद्धिः व्यृद्धिः। 'इको यणचि' (पा. सू. ६.१.७७) इति यणादेशः। दारिद्र्यमर्थः। व्यृध्नोति इति विपूर्वः ऋधु वृद्धौ (स्वा. १२४७) इति धातुः।

अपक्षयसामान्ये प्रचुरं प्रयुक्ता दृश्यन्ते इमे सप्त - अपक्षयति क्षायति जायति सायति दीयते तस्यति दस्यति। आद्याश्चत्वारो भ्वादौ। ततस्त्रयो दिवादौ। अपक्षयति इति अपपूर्वस्य क्षि क्षये (भ्वा. २३६) इत्यस्य धातो रूपम्। क्षायति इति क्षै क्षये (भ्वा. ९१४) इत्यतो जायते। जायति इति जै क्षये (भ्वा. ९१५)। इत्यस्मान्निष्पद्यते। सायतीति षै क्षये (भ्वा. ९१६) इत्यतो निष्पन्नम्। 'धात्वादेः षः सः' (पा.सू. ६.१.६४) इति सत्वम्। दीयते इति दीङ् क्षये (दिवा. ११३५) इत्यस्माज्जायते। तस्यति इति तसु उपक्षये (दिवा. १२१३) इत्यतो भवति। दस्यति इति दसु च उपक्षये (दिवा. १२१४) इत्यस्माद्धातो जायते।

६. नाशः। उपरमति उद्वाति उद्वायति आरमति अप्येति म्रियते निर्वाति निर्वायति रिष्यति विलीयते विनश्यति विपद्यते विध्यायति विरमति जम्भयति नक्कयति प्रलीयते प्रमीयते प्रैति प्रध्वंसते पंसयंति पण्डयति परैति पर्यवस्यति धक्कयति धरते सन्तिष्ठते समाप्नोति शाम्यति। इत्येते नाशबोधकाः पर्यायेण प्रयुज्यन्ते।

विनाशं वर्णयति - विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधतीति निरुक्ते। विनाश एवात्रापरभावस्तस्यादिमुपक्रमप्रभृत्यपवर्गपर्यन्तमाचष्टे विनश्यतीति। तस्याञ्चावस्थायां विद्यमानमपि पूर्वभावमपक्षीयतेरर्थं नाचष्टे न प्रतिषेधतीति सर्वं निरवद्यमिति दुर्गाचार्यः।

विनाशो बहुमुखः। क्वचिदभिव्यक्तपदार्थानामदर्शनरूपः। क्वचिच्च तदवस्थापगमरूपः। क्वचिज्जीवतां मृत्युरूपः। क्वचिच्च ज्वलतां दीप्तिनिर्वपचनरूपः।

विनाशसामान्ये प्रचुरं प्रयुक्ता इमे त्रयोदश - प्रध्वंसते धरते अप्येति विलीयते प्रलीयते विनश्यति रिष्यति विपद्यते जम्भयति नक्कयति धक्कयति पण्डयति पंसयति। विनाशः

In Public domain. Digitization Muthulakshmi Research Academy

स्याददर्शनमित्यमरः। आद्यौ भ्वादी। द्वितीयोऽदादिः। ततः पञ्च दैवादिकाः। तत आन्तं चौरादिकाः। प्रध्वंसत इत्यत्र प्रपूर्वः ध्वंसु अवस्रंसने गतौ च (भ्वा. ७५५) इति धातुः। धरते इत्यत्र धृङ् अवध्वंसने (भ्वा. ९६१) इत्ययं धातुः। अप्येति इति अपिपूर्वात् इण् गतौ (अदा. १०४६) इत्यस्माज्जायते। विलीयत तथा प्रलीयते इत्यत्र विपूर्वः तथा प्रपूर्वकश्च लीङ् श्लेषणे (दिवा. ११४०) इति धातुः। विश्यति इति विपूर्वात् णश अदर्शने (दिवा. ११९५) इत्यस्माज्जातः। रिष्यति इति रिष हिंसायाम्। (दिवा. १२३२) इत्यस्य रूपम्। विपद्यत इत्येतत् विपूर्वात् पद गतौ (दिवा. ११७०) इत्यस्माज्जायते। 'ममैव शोकेन विदीर्णवक्षसा त्वया विचित्राङ्गि विपद्यते यदी'ति श्रीहर्षः (नैष १.१४०)। जम्भयति इत्यत्र जभि नाशने (चुरा. १७१७) इत्ययं धातुः। नक्कयति इत्येदद्रूपं नक्क नाशने (चुरा. १५९४) इत्यतो निष्पन्नः। धक्क्यति इति धक्क नाशने (चुरा. १५९५) इत्यस्माज्जायते। पण्डयति इति पडि नाशने (चुरा. १६१६) इत्यस्य रूपम्। पंसयति इत्येतत्पसि नाशने (चुरा. १६१७) इत्यस्माज्जायते।

मरणवाचकाः इमे दश प्रयुज्यन्ते – विरमति आरमति उपरमति सन्तिष्ठते परैति प्रैतिं प्रमीयते पर्यवस्यति समाप्नोति म्रियते स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः। अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियामित्यमरः। आद्याश्चत्वारो भ्वादयः। ततो द्वावदादी। ततश्च द्वौ दिवादी। उपान्त्यः स्वादी। अन्त्यश्च तुदादिः।

